श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरङ्गरामानुजमहादेशिकैः (श्रीमुष्णं आण्डवन्) अनुगृहीतं

# ॥ श्री गुरुवरस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री गुरुवरस्तोत्रम् ॥

अथ स्तोत्रं प्रवक्ष्यामि गुरोस्स्वात्मस्वरूपिणः।
येन भक्तिपथो दिव्यः प्रसिद्ध्यति परात्मनि ॥

यश्श्रीपुराणपुरुषस्य मुखारविन्दात्
सम्भूत भक्तिपथमाविरभूत्प्रणेतुम्।
साक्षात्करोति सकलां सकलात्मलीलां
तं श्रीमदार्यचरणं शरणं व्रजेम ॥ 1 ॥

यस्याङ्घ्रि पङ्कजयुगेऽम्बुजवज्रचाप -
कौमोदकी -व्रतति -तोरण -सत्पताकाः।
मीनाङ्कुशध्वज यवासि सरोजकुम्भाः
तं श्रीमदार्यचरणं शरणं भजेम ॥ 2 ॥

यश्शारदेन्दुधवलां विमलाब्जगर्भ -
वासोभिशोभिततमां निजभूषणाङ्गाम्।
स्वात्मेन्दिरां हरिपदां दधतेऽमृताब्धेः
तं श्रीमदार्यचरणं शरणं भजेम ॥ 3 ॥

यश्चक्रशङ्खसुगदाम्बुजभूषिताङ्गो
यो यज्ञसूत्रकलितो ललितोर्ध्वपुण्ड्रः।
पीताम्बरस्तुलसिकाभरणोऽत्युदारः
तं श्रीमदार्यचरणं शरणं भजामः ॥ 4 ॥

वर्णाश्रम श्रमकृतैर्विविधैस्स्वधर्मैः
दानैर्व्रतैरपिमखैः सुतपोभिरुग्रैः।
नाशीर्भजन्ति चरणाम्बुजमस्य हित्वा
तं श्रीमदार्यचरणं शरणं भजेम॥ 5॥

दीनस्य हीन सकलागम साधनस्य
पीनस्य पापपटलैरपि लीनबुद्धेः।
यस्याङ्घ्र्यधीनमनसः स्वयमेति भक्तिः
तं श्रीमदार्यचरणं शरणं भजामः॥ 6॥

यस्स्वाश्रितोद्धृति कृते चकमेऽवतारान्
तीर्थात्मना ह्युपदिदेश सुभक्तिमार्गान्।
सद्यस्स्वयं हरिरमुष्य वशीकृतश्च
तं श्रीमदार्यचरणं शरणं भजेम॥ 7॥

निस्साधनाय चरणाम्बुजमाश्रिताय
सम्यग् विशोध्य कुरुते हरिसज्जनाय।
यस्मात्परो न करुणावरुणालयोऽन्यः
तं श्रीमदार्यचरणं शरणं भजेम॥ 8॥

इदं गुरुवरस्तोत्रं गुरुप्रीत्यै सदा पठेत्।
गुरुपूजाफलं प्राप्य हरिभक्तिं च विन्दति॥ 9॥

॥ इति श्री गुरुवरस्तोत्रं समाप्तम्॥